# Dakshinakalika Stotram

# दक्षिणकालिकास्तोत्रम्

## Document Information

Text title : Dakshinakalika Stotram

File name : dakShiNakAlikAstotram.itx

Category : devii, devI

Location : doc_devii

Proofread by : Rajani Arjun Shankar

Latest update : February 25, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

April 19, 2025

*sanskritdocuments.org*

# दक्षिणकालिकास्तोत्रम्

ॐ कृशोदरि महाचण्डि मुक्तकेशि बलिप्रिये ।
कुलाचारप्रसन्नास्ये नमस्ते शङ्करप्रिये ॥ १॥

घोरदंष्ट्रे कोटराक्षि गीतिशब्द-प्रसाधिनि । (किंचिशब्द, किंतिशब्द, प्रणादिनि, निनादिनि)
घुरघोरारवास्फारे नमस्ते चित्तवासिनि ॥ २॥ (घोरघोरारवास्फाले, गुरुघोरारवास्फाले, चितिवासिनि)

बन्धूकपुष्प-सङ्काशे त्रिपुरे भयनाशिनि ।
भाग्योदय-समुत्पन्ने नमस्ते वरवर्णिनि ॥ ३॥

जय देवि जगद्धात्रि त्रिपुराद्ये त्रिदेवते । (त्रिदैवते)
भक्तेभ्यो वरदे देवि महिषघ्नि नमोऽस्तुते ॥ ४॥

घोरविघ्न-विनाशाय कुलाचार-समृद्धये ।
नमामि वरदे देवि मुण्डमाला-विभूषणे ॥ ५॥

रक्तधारा-समाकीर्णे कलकाञ्ची-विभूषिते । (करकाञ्ची, कृतकाञ्ची)
सर्वविघ्नहरे कालि नमस्ते भैरवप्रिये ॥ ६॥

नमस्ते दक्षिणामूर्त्ते कालि त्रिपुरभैरवि ।
भिन्नाञ्जन-चयप्रख्ये प्रवीण-शवसंस्थिते ॥ ७॥

गलच्छोणित-धाराभिः स्मेरानन-सरोरुहे ।
पीनोन्नत-कुचद्वन्द्वे नमस्ते घोरदक्षिणे ॥ ८॥

आरक्तमुखशान्ताभिर्नेत्रालिभिर्विराजिते ।
शवद्वय-कृतोत्तंसे नमस्ते मदविह्वले ॥ ९॥

पञ्चाशन्मुण्ड-घटितमाला-लोहितलोहिते ।
नानामणि-विशोभाढ्ये नमस्ते ब्रह्मसेविते ॥ १०॥

शवास्थि-कृतकेयूरे शङ्ख-कङ्कण-मण्डिते ।
शववक्षःसमारूढे नमस्ते विष्णुपूजिते ॥ ११॥

शवमांसकृतग्रासे साट्टहासे मुहुर्मुहुः ।
मुखशीघ्र-स्मितामोदे नमस्ते शिववन्दिते ॥ १२॥

खड्गमुण्डधरे वामे सव्येऽभयवरप्रदे ।
दन्तुरे च महारौद्रे नमस्ते चण्डनायिके ॥ १३॥

त्वं गतिः परमा देवि त्वं माता परमेश्वरि ।
त्राहि मां करुणासार्द्रे नमस्ते चण्डनायिके ॥ १४॥

नमस्ते कालिके देवि नमस्ते भक्तवत्सले ।
मूर्खतां हर मे देवि प्रतिभा-जयदायिनि ॥ १५॥

गद्यपद्यमयीं वाणीं तर्क-व्याकरणादिकम् ।
अनधीतागतां विद्यां देहि दक्षिणकालिके ॥ १६॥

जयं देहि सभामध्ये धनं देहि धनागमे ।
देहि मे चिरजीवित्वं कालिके रक्ष दक्षिणे ॥ १७॥

राज्यं देहि यशो देहि पुत्रान् दारान् धनं तथा ।
देहान्ते देहि मे मुक्तिं जगन्मातः प्रसीद मे ॥ १८॥

ॐ मङ्गला भैरवी दुर्गा कालिका त्रिदशेश्वरी ।
उमा हैमवती कन्या कल्याणी भैरवेश्वरी ॥ १९॥

काली ब्राह्मी च माहेशी कौमारी वैष्णवी तथा ।
वाराही वासवी चण्डी त्वां जगुर्मुनयः सदा ॥ २०॥

उग्रतारेति तारेति शिवेत्येकजटेति च ।
लोकोत्तरेति कालीति गीयसे कृतिभिः सदा ॥ २१॥

यथा काली तथा तारा तथा छिन्ना च कुल्लुका ।
एकमूर्त्तिश्चतुर्भेदा देवि त्वं कालिका पुरा ॥ २२॥

एकद्वि-त्रिविधा देवी कोटिधानन्तरूपिणी ।
अङ्गाङ्गिकैर्नामभेदैः कालिकेति प्रगीयते ॥ २३॥

शम्भुः पञ्चमुखेनैव गुणान् वक्तुं न ते क्षमः ।
चापल्यैर्यत्कृतं स्तोत्रं क्षमस्व वरदा भव ॥ २४॥

प्राणान् रक्ष यशो रक्ष पुत्रान् दारान् धनं तथा ।
सर्वकाले सर्वदेशे पाहि दक्षिणकालिके ॥ २५॥

यः सम्पूज्य पठेत् स्तोत्रं दिवा वा रात्रिसन्ध्ययोः ।
धनं धान्यं तथा पुत्रं लभते नात्र संशयः ॥ २६॥

इति दक्षिणकालिकास्तोत्रं सम्पूर्णम् ।

Note: Although transcribed from the audio linked, this stotra has many shlokas in common (or with some modification of the original text - both in words, and even grammar e.g. danture vs danturAM pt maNDite vs maNDItAm) and compiled from several places from these (and perhaps some other) texts such as कौलावलीनिर्णय, बृहन्नीलतन्त्रम्, तन्त्रचिन्तामणि and a compilation . See links below to some references.

Proofread by Rajani Arjun Shankar

*Dakshinakalika Stotram*

pdf was typeset on April 19, 2025

Please send corrections to *sanskrit@cheerful.com*